National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2021; 1(37): 235-237
© 2021 NJHSR
www.sanskritarticle.com

**Dr.D.P.Y.Yajulu**
Assistant Professor,
Dept.of Krishna Yajurveda,
Sri Venkateswara Vedic University,
Tirupati - 517502

**Correspondence:**
**Dr.D.P.Y.Yajulu**
Assistant Professor,
Dept.of Krishna Yajurveda,
Sri Venkateswara Vedic University,
Tirupati - 517502

# गृह्यसूत्रेषु गर्भसंस्कारपरिशीलनम्

**Dr.D.P.Y.Yajulu**

**प्रस्तावना -**

भारतीयपरम्परा धर्म-अर्थ-काम-मोक्ष-इति पुरुषार्थचतुष्टयस्य आधारेण सुदृढा प्रतिष्ठिता अस्ति। एतेषु मोक्षप्राप्तिरेव मानवजीवनस्य परमं लक्ष्यम् अर्थात् जननमरणचक्रात मुक्तिं प्राप्य जीवात्मनः परमात्मना सह ऐक्यसाधनमेव अन्तिममुद्देश्यम्। तदर्थं वैराग्यभावम् उत्पाद्य मानवं संस्कृतं कर्तुं शास्त्रेषु संस्काराः विहिताः। संस्काराणां मुख्योद्देश्यं केवलं भौतिकसुखप्राप्तिः न, अपि तु आत्मनः शरीरस्य च शुद्धीकरणम्। वीरमित्रोदये संस्कारस्य लक्षणम् एवं वर्णितम् -

**आत्मशरीरान्यतरनिष्ठः अतिशयविशेषः संस्कारः**[1]। इति।

अर्थात् संस्कारः नाम शास्त्रविहितानि तानि कर्माणि, यैः पापक्षयः सद्गुणोत्पत्तिश्च भवति, येन मानवः विशिष्टकर्मसु अधिकारं प्राप्नोति। संस्काराः मनसः शरीरस्य च शुद्धिं कृत्वा इहलोके आरोग्यकरं, शान्तिपूर्णं जीवनं तथा च परलोके मोक्षं च यच्छन्ति।

**संस्काराणां संख्या**

संस्काराणां संख्याविषये महर्षीणां भिन्नाभिप्रायाः सन्ति। महर्षिणा गौतमेन पञ्चमहायज्ञाः, सप्तपाकयज्ञाः, सप्तहविर्यज्ञाः, सप्तसोमयज्ञाश्चेति आहत्य चत्वारिंशत् (४०) संस्काराः उक्ताः। परन्तु कालक्रमेण व्यावहारिकदृष्ट्या संस्कारदीपिकादिग्रन्थेषु षोडशसंस्काराः (१६) एव आधिक्येन परिगणिताः -

**आधानपुंसवनसीमन्तजातनामान्नचौलकाः।**
**मौञ्जीव्रतानि गोदानसमावर्तनविवाहकाः ॥**
**अन्त्यं चैतानि कर्माणि प्रोच्यन्ते षोडशैव तु**[2]**॥**

ते च षोडशसंस्काराः - १. गर्भाधानम्, २. पुंसवनम्, ३. सीमन्तोन्नयनम्, ४. जातकर्म, ५. नामकरणम्, ६. अन्नप्राशनम्, ७. चूडाकर्म (चौलं), ८. उपनयनम्, ९-१२. चत्वारि वेदव्रतानि, १३. केशान्तः (गोदानम्), १४. समावर्तनम्, १५. विवाहः, १६. अन्त्येष्टिः चेति भवन्ति।

**षोडशसंस्काराणाम् उद्देश्यानि**

प्रत्येकस्य संस्कारस्य विशिष्टं फलं शास्त्रेषु एवं वर्णितम् -

**निषेकाद्बैजिकं चैनः गार्भिकं चापमृज्यते ।**
**क्षेत्रसंस्कारसिद्धिश्च गर्भाधानफलं तथा ॥**
**गर्भे भवेच्च पुंसूतेः पुंस्त्वस्य प्रतिपादनम्।**
**निषेकफलवज्ज्ञेयं फलं सीमन्तकर्मणः ॥**
**गर्भाम्बुपानजो दोषः जातात्सर्वोऽपि नश्यति ।**
**आयुर्वर्चोऽभिवृद्धिश्च सिद्धिर्व्यवहृतिस्तथा॥**
**नामकर्मफलं त्वेतत् समुद्दिष्टं मनीषिभिः।**
**अन्नाशनान्मातृगर्भमलाशादपि शुध्यति॥**
**बालायुर्वर्चोवृद्धिश्च चूडाकर्मफलं स्मृतम्।**

**उपनीतेः फलं त्वेतत् द्विजातिसिद्धिपूर्विका ॥**
**वेदाधीत्यधिकारस्य सिद्धिर्ऋषिभिरीरिता ।**
**देवपित्रर्णोपगमः विवाहस्य फलं स्मृतम्[3] ॥**

एतेषां श्लोकानाम् अयमाशयः - गर्भाधानसंस्कारेण वीर्य-रक्त-सम्बन्धिताः दोषाः नश्यन्ति। पुंसवनं सत्पुत्रप्राप्त्यर्थं भवति। सीमन्तोन्नयनं गर्भाधानवत् फलदायकम्। जातकर्णा गर्भाम्बुपानदोषः नश्यति। नामकरणेन आयुः तेजः च वर्धते। अन्नप्राशनेन गर्भमलदोषः परिह्रियते। चौलकर्मणा बलम् आयुश्च वर्धते। उपनयनेन द्विजत्वं प्राप्य वेदाध्ययनाधिकारः सिद्ध्यति। विवाहेन देव-पितृ-ऋणानां विमोचनं भवति।

**गर्भसंस्काराः**

गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम् च इति त्रयः गर्भसंस्काराः सन्ति। क्वचिदृतुसङ्गमनं विष्णुबलिरिति द्वौ संस्कारावपि गर्भ-संस्कारावित्युक्तम्। प्रसिद्धमतमनुसृत्य अत्र त्रयाणां संस्कारा-णामुल्लेखः कृतः। एतेषां गर्भसंस्काराणां मुख्यमुद्देश्यं सुप्रजाजननं, मातुः गर्भस्य च रक्षणं, गर्भिण्याः मानसिकशारीरिक-स्वास्थ्यवर्धनं च अस्ति।

**१. गर्भाधानसंस्कारः**

**व्युत्पत्तिः - निषिक्तो यत्प्रयोगेण गर्भः संधार्यते स्त्रिया।**
**तद् गर्भालम्भनं नाम कर्म प्रोक्तं मनीषिभिः[4]॥**

अस्यायमर्थः- "स्त्रियाः गर्भाशये पिण्डस्य स्थापनम्" इति। येन कर्मणा स्त्रियाः गर्भाशये शुक्रशोणितसंयोगेन गर्भः स्थाप्यते तत् गर्भाधानम्। अस्य उल्लेखः अथर्ववेदे (५.२५) तथा बृहदारण्यकोपनिषदि (६.४.२१) च दृश्यते।

**उपयुक्तकालः**

इन्द्रस्य वरदानेन स्त्रियः स्वेच्छया ऋतुकाले सम्भोगं कर्तुम् अर्हन्ति। विवाहानन्तरं चतुर्थ्यां रात्रौ ऋतुकाले वा इदं कर्म विहितम्। मनुस्मृतौ उत्तमसन्तानप्राप्त्यर्थं कालनिर्देशः एवं कृतः-

**ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ।**
**चतुर्भिरितरैः सार्धं अहोभिः सद्विगर्हितैः[5]॥**
**तासां आद्याश्चतस्रस्तु निन्दितैकादशी च या ।**
**त्रयोदशी च शेषास्तु प्रशस्ता दशरात्रयः[6]॥**

अर्थात् रजोदर्शनात् परं आद्याः चतस्रः रात्रयः, एकादशी, त्रयोदशी तथा पर्वदिनानि वर्जयित्वा अन्या रात्रिषु गर्भाधानं प्रशस्तम्। युग्मासु रात्रिषु सम्भोगेण पुत्रः, अयुग्मासु कन्या च जायते इति शास्त्रनिश्चयः।

**संस्कारविधिः**

बौधायनगृह्यसूत्रानुसारं (१.७.३७) ऋतुस्नाता स्त्री अलङ्कृता सती शयने उपविशेत्। तदा भर्ता मन्त्रान् पठेत् -

**विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।**
**आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते[7]॥**

तदनन्तरं परस्परं प्रेम्णा आलिङ्ग्य गर्भाधानकर्म कुर्यात्। अन्ते भर्ता पत्न्याः हृदयं स्पृष्ट्वा दीर्घायुष्यप्रार्थनां कुर्यात् –

**यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम्। वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतमिति[8]॥**

**आयुर्वेदिकदृष्टिकोणः**

आयुर्वेदशास्त्रे गर्भाधानार्थं पुरुषस्य पञ्चविंशतिवर्षाणि, स्त्रियाः षोडशवर्षाणि च न्यूनातिन्यूनं वयः भवितव्यम् इति सुश्रुतसंहितायां वर्णितम् -

**पञ्चविंशे ततो वर्षे पुमान् नारी तु षोडशे।**
**समत्वागतवीर्यौ तौ जानीयात् कुशलो भिषक्[9]।।**

अतुल्यगोत्रे विवाहः, रजःक्षयान्ते (ऋतुकाले) सङ्गमः, शारीरिक-मानसिकस्वास्थ्यं च उत्तमसन्तानार्थम् अत्यावश्यकानि सन्ति।

**२. पुंसवनसंस्कारः**

**व्युत्पत्तिः-** पुमान् सूयते अनेन इति पुंसवनम्। (वीरमित्रोदयः) येन कर्मणा पुमान् (पुत्रः) उत्पद्यते, तत् कर्म पुंसवनम् इत्युच्यते। प्राचीनकाले कृषिकार्यार्थं, समाजस्य रक्षणार्थं, पितॄणाम् ऋणवि-मोचनार्थं च पुत्राणाम् आवश्यकता अधिका आसीत्। अतः अयं संस्कारः विहितः।

**उपयुक्तकालः -** आपस्तम्बगृह्यसूत्रानुसारम् - **पुंसुवनं व्यक्ते गर्भे तिष्येण[10]**। अर्थात् यदा गर्भः व्यक्तः भवति (तृतीये वा चतुर्थे मासि), तदा तिष्य (पुष्य) नक्षत्रे इदं कर्म कर्तव्यम्।

**संस्कारविधिः-** अस्मिन् कर्मणि न्यग्रोधस्य (वटवृक्षस्य) शृङ्गाणि (अग्रभागाः) गृहीत्वा तानि निष्पीड्य तद्रसं गर्भिण्याः दक्षिणनासापुटे निषिच्यते। शौनकमुनेः मतानुसारं अयं संस्कारः प्रतिगर्भं कर्तव्यः। तदा अथर्ववेदमन्त्राः पठ्यन्ते -

**आ ते योनिं गर्भ एतु पुमान् वाण इवेषुधिम् ।**
**आवीरोऽत्र जायतां पुत्रस्ते दशमास्यः[11]॥**
**पुमांसं पुत्रं जनय तं पुमान् अनु जायताम् ।**
**भवासि पुत्राणां माता जातानां जनयाश्च यान्[12]॥**

**वैज्ञानिकं तथा आयुर्वेदिकं महत्त्वम् –**

आयुर्वेदे चरकसुश्रुतादिमहर्षिभिः पुंसवनविधयः सविस्तरं वर्णिताः। पुष्यनक्षत्रे वटवृक्षस्य अङ्कुरान् दुग्धेन सह पिष्ट्वा नासायां नस्यरूपेण प्रयुज्यते। अनेन गर्भस्थशिशोः लिङ्गनिर्धारणे प्रभावः भवति, गर्भिण्याः स्वास्थ्यं वर्धते, गर्भस्रावश्च निवार्यते।

**३. सीमन्तोन्नयनसंस्कारः-**

**व्युत्पत्तिः -**

**सीमन्त उन्नीयते यस्मिन् कर्मणि तत् सीमन्तोन्नयनम्[13]**। सीमन्त इत्यस्य अर्थः केशानां मध्यभागः, उन्नयनम् इत्यस्य अर्थः उपरि नयनम्। गर्भिण्याः केशानां द्विधा विभाजनम् अत्र क्रियते।

**उपयुक्तकालः -**

**सीमन्तोन्नयनं प्रथमे गर्भे चतुर्थे मासि[14]**। इति आपस्तम्ब-गृह्यसूत्रानुसारं चतुर्थे मासि अयं संस्कारः क्रियते। इदं कर्म केवलं प्रथमगर्भे एव क्रियते यतः अयं क्षेत्रसंस्कारः अस्ति। केचन महर्षयः षष्ठे वा अष्टमे मासि अपि अस्य आचरणं कुर्वन्ति।

**संस्कारविधिः-**

प्रथमतः उदकशान्तिः क्रियते। ततः गर्भिणी भद्रपीठे उपविशति। भर्ता उदुम्बरवृक्षस्य फलयुक्तशाखया, शलल्या (यस्मिन् त्रीणि श्वेतानि बिन्दूनि सन्ति), कुशपिञ्जूलैश्च गर्भिण्याः सीमन्तं (केशान्)

पुरतः आरभ्य पृष्ठभागपर्यन्तं त्रिवारम् ऊर्ध्वं नयति। तदा व्याहृतिभिः मन्त्राः पठ्यन्ते। तदनन्तरं वीणावादनं भवति यत् गर्भस्थशिशोः मनसि शान्तिम् उत्पादयति। अत्र राका (पूर्णिमादेवता), धाता, प्रजापतिः च स्तूयन्ते।

**मनोवैज्ञानिकं महत्त्वम्-**

अस्य कर्मणः मुख्यमुद्देश्यं गर्भिण्याः मानसिकप्रसन्नता, अमङ्गल-वारणम्, गर्भस्थशिशोः आयुषः मेधायाश्च वर्धनम् अस्ति। चतुर्थे पञ्चमे च मासि गर्भस्थशिशोः मनसः विकासः भवति। अतः सुस्वरसङ्गीतेन, मन्त्रपठनेन च शिशोः बुद्धिविकासः उत्तमः भवति।

**गर्भिणीधर्माः -**

गर्भिण्याः आचारविचारौ गर्भस्थशिशोः उपरि साक्षात् प्रभावं जनयतः। अतः पद्मपुराणे काश्यपमहर्षिणा अदितये गर्भिणीधर्माः उपदिष्टाः -

**नावस्करेषूपविशेन्मुसलोलूखलादिषु ।**
**जलं च नावगाहेत शून्यागारं विवर्जयेत् ॥**
**वल्मीकं नाधितिष्ठेत न चोद्विग्नमना भवेत् ।**
**विलिखेन्न नखैर्भूमिं नाङ्गारेण न भस्मना ॥**
**न शयालुः सदा तिष्ठेद्व्यायामं च विवर्जयेत् ।**
**न तुषाङ्गारभस्मास्थिकपालेषु समाविशेत् ॥**
**वर्जयेत्कलहं गेहे गात्रभङ्गं तथैव च ।**
**न मुक्तकेशा तिष्ठेत नाशुचिः स्यात्कदाचन ॥**
**न शयीतोत्तरशिरा न चैवाधःशिराः क्वचित् ।**
**न वस्त्रहीना नोच्छिष्टा न चार्द्रचरणा तथा ॥**
**नामङ्गल्यं वदेद्वाक्यं न च हास्याधिका भवेत् ।**
**कुर्याच्छ्वशुरयोर्नित्यं पूजां माङ्गल्यतत्परा ॥**
**तिष्ठेत्प्रसन्नवदना सदा भर्तुर्हिते रता[15]॥**

**अस्यार्थः -** १. गर्भिणी मलिने स्थाने, उलूखलादिषु न उपविशेत्। २. निर्जनप्रदेशं (शून्यगृहं) न गच्छेत्, श्मशानं च वर्जयेत्। ३. सा सदा शोकाकुलिता, उद्विग्नमनाः न भवेत्। ४. व्यायामादीन् कठिनपरिश्र-मान्, नद्यां तरणं, वृक्षारोहणं च त्यजेत्। ५. उच्चैः भाषणं, कलहं, अश्लीलभाषणं च वर्जयेत्। ६. नित्यं प्रसन्ना भवेत्, श्वश्रूश्वशुरयोः पूजां कुर्यात्, भर्तुः हिते रता भवेत्। ७. सूर्यग्रहण-चन्द्रग्रहणसमये बहिः न गच्छेत्।

**गर्भिणीपतिधर्माः**

गर्भिण्याः पतिः अपि विशिष्टान् नियमान् पालयेत्। गर्भिण्याः इच्छानां (दौहृदस्य) पूरणं भर्तुः परमं कर्तव्यम्।

**दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ।**
**वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः[16]॥**

यदि गर्भिण्याः इच्छा न पूर्यते, तर्हि गर्भस्थशिशुः विकलाङ्गः भवितुमर्हति, गर्भस्रावो वा भवितुमर्हति। अन्यच्च -

**क्षौरं शवानुगमनं नखकृन्तनं च युद्धं च वास्तुकरणं त्वतिदूरयानम् ।**
**उद्वाहमौपनयनं जलधेर्वगाह आयुष्क्षयो भवति गर्भिणिकापतीनाम् ॥**

गर्भावस्थायाः षष्ठमासात् परं भर्ता क्षौरकर्म, शवानुगमनं, युद्धं, नूतनगृहनिर्माणं, दूरयात्राम्, समुद्रस्नानं च वर्जयेत्।

**आयुर्वेदे गर्भिणीपरिचर्या**

आयुर्वेदशास्त्रे गर्भिण्याः कृते मासक्रमेण आहारविहारयोः सविस्तरं वर्णनं कृतम् अस्ति। महर्षिणा काश्यपेन उक्तं यत् गर्भिण्याः रक्षणं तैलपूर्णपात्रवत् अतीव सावधानतया कर्तव्यम्।

- **प्रथममासः:** मधुर-शीत-द्रवाहारः, इष्टानुसारं दुग्धपानम्।
- **द्वितीयमासः:** मधुरौषधसिद्धं दुग्धम्।
- **तृतीयमासः:** मधु-घृतमिश्रितं दुग्धं, षष्टिकशाल्योदनम्।
- **चतुर्थमासः:** नवनीतमिश्रितं दुग्धं, दध्योदनम्।
- **पञ्चममासः:** पयसा सिद्धम् ओदनम्, क्षीरसर्पिः।
- **षष्ठः सप्तमश्च मासः:** गोक्षुरादिसिद्धं क्षीरसर्पिः।
- **अष्टममासः:** घृतमिश्रिता यवागूः।

**वर्जनीया आहाराः**

अतिगुरु-उष्ण-तीक्ष्ण-पदार्थाः, मद्यपानं, शुष्काहाराः, मलिनाहा-राश्च सर्वथा वर्जनीयाः। वेगधारणं (मूत्रपुरीषादीनां रोधनं), रात्रौ जागरणम्, दिने शयनं च न करणीयम्।

**मानसिकस्वास्थ्यम्**

गर्भिणी सर्वदा देवब्राह्मणगुरून् पूजयेत्, मङ्गलवाद्यानि शृणुयात्, शुभ्रवस्त्राणि धारयेत्, श्वेताश्व-श्वेतवृषभादीन् शुभपदार्थान् पश्येत्। सुगन्धितपुष्पाणि धारयेत्, सात्त्विकसाहित्यं च पठेत्। प्रह्लाद-अभिमन्यु-अष्टावक्रादीनां कथाभिः स्पष्टं भवति यत् गर्भस्थशिशुः मातुः श्रवणेन, विचारेण च ज्ञानं प्राप्नोति।

**उपसंहारः-**

निष्कर्षतः, गृह्यसूत्रेषु, धर्मशास्त्रेषु, आयुर्वेदग्रन्थेषु च वर्णिताः गर्भसंस्काराः केवलं कर्मकाण्डरूपाः अन्धविश्वासाः वा न सन्ति, अपि तु तेषु अत्यन्तं गहनं मनोवैज्ञानिकं, सामाजिकं, वैद्यकीयञ्च रहस्यं निगूढम् अस्ति। एतेषां संस्काराणां सम्यक् अनुष्ठानेन, आहारविहार-नियमानां पालनेन च उत्तमसन्तानस्य प्राप्त्या सह सुदृढस्य, प्रज्ञावतः, आरोग्यपूर्णस्य समाजस्य निर्माणं नूनं सम्भवति।

**पाद टिप्पणी**

1. वीरमित्रोदयः संस्कारप्रकरणम्
2. संस्कारदीपकः, द्वितीयो भागः, उपोद्धातप्रकरणम्
3. संस्काररत्नमाला पृ. २
4. वीरमित्रोदयः, संस्कारप्रकाशः, पृ.१३२
5. मनुस्मृतिः ३.४६
6. मनुस्मृतिः ३.४७
7. ऋग्वेदः १०.१८४.१
8. पारस्करगृह्यसूत्रम् १.११.९
9. सुश्रुतसंहिता ३५.१३
10. आपस्तम्बगृह्यसूत्रम् १४.९
11. अथर्ववेदः ३.२३.२
12. अथर्ववेदः ३.२३.३
13. वीरमित्रोदयः, संस्कारप्रकाशः, पृ.१७२
14. आपस्तम्बगृह्यसूत्रम् १४.१
15. संस्काररत्नमाला २.२
16. याज्ञवल्क्यस्मृतिः ३.७९